एवं सम्पूजिता देवाः शान्तिं कुर्व्वन्ति ते सदा।
सुरेभ्यः काञ्चनं दद्याद्ब्राह्मणे गां पयस्विनीम् ॥
राक्षसीनां बलिर्द्देयः अपि याद्दक् तथा शृणु।
मांसौदनं घृतं पद्मं केशरं हविषान्वितम् ।
ईशानभागमाश्रित्य चरक्यै विनिवेदयेत् ॥
दध्योदनं सरुधिरमस्थिखण्डेश्च संयुतम्।
पीतरक्तबलिं दद्यात् पूतना या तु राक्षसी ॥
वायव्ये पापराक्षस्यै मत्स्यमांससुरासवम् ।
पायसं चापि दातव्यं स्वनाम्ना सर्व्वतः क्रमात्।
नमस्कारान्तयुक्तेन प्रणवाद्येन सर्व्वतः ॥ ” * ॥
ततः सर्व्वौषधिस्नानं यजमानस्य कारयेत् ।
द्विजांस्तु पूजयेद्भक्त्या ये चान्ये गृहमागताः ॥
एतद्वास्तुपशमनं कृत्वा कर्म्म समारभेत् ।
प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने ॥
पुरवेश्मप्रवेशेषु सर्व्वदोषापनुत्तये ।
इति वास्तूपशमनं कृत्वा सूत्रेण वेष्टयेत् ॥
रक्षोघ्नपवमानेन सूक्तेन भवनादिकम् ।
नृत्यमङ्गलवाद्येन कुर्य्याद्ब्राह्मणवाचनम् ॥
अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः ।
गृहे वायतने कुर्य्यान्न स दुःखमवाप्नुयात् ॥
न च व्याधिभयं तस्य न च बन्धुधनक्षयः ।
जीवेद्वर्षशतं स्वर्गे कल्पमेकं वसेन्नरः ॥ ” * ॥
हयशीर्षपञ्चरात्रे ।
“एवं प्रगृह्य काष्ठानि रजसापूर्य्य देशिकः ।
एतेषामेव देवानां बलिं दद्यात्तु कामिकम् ॥
ईशानाय प्रदातव्यं पायसं मधुना सह ।
पर्ज्जन्याय जलं देयं पुष्पगन्धादिवासितम् ॥
जयन्ताय प्रदातव्या पताका पीतवर्णिका ।
सुरेशाय च रत्नानि भास्कराय घृतं तथा ॥
धूम्रकं पीतवर्णं वा सत्ये दद्याद्वितानकम् ।
दद्याद्भृशे पक्षिमांसं व्योमाय त्वचमव्यये ॥
पूष्णे धानाः सलाजास्तु सुवर्णं वितथे तथा ।
गृहक्षताय मध्वन्नं यमाय पिशितौदनम् ॥
गन्धं गन्धर्व्वदेवाय भृङ्गे दद्यात्तु शाकुनम् ।
मृगे तिलयवांश्चैव पितृभ्यः कृशरं तथा ॥
दौवारिके दन्तकाष्ठं सुग्रीवे यावकं तथा ।
पुष्पदन्ते कुशा देया वरुणे पद्मसुत्पलम् ॥
असुरायैचवं देयं रक्षं शोषे घृतौदनम् ।
यवास्तु देयाः पापाय रोगाय घृतमण्डकम् ॥
नागाय नागपुष्पाणि भल्लाट सुख्याय दापयेत् ।
चित्रौदनञ्च भल्लाटे सोमाय मधुपायसम् ॥
नागाय चापि शालूकं श्रिये सरसपायसम् ।
अदित्यै पूरिका देया चीरं चाङ्गो दद्देद्बलिम् ॥
दधि क्षीरं चापवत्से अर्य्यम्णे लड्डुकं बलिम् ।
कुशोदकं सवित्रे च साविन्ने गुड़पूर्व्वकम् ॥
विवस्वते रक्तपुष्पं रक्तचन्दनमेव च ।
हरिद्रान्नं तथेन्द्राय सान्यामन्तु जयाय च ॥
घृतपूरन्तु मित्राय रुद्राय गुड़पायसम् ।
आमपक्वानि मांसानि प्रदद्याद्राजयक्ष्मणे ॥
पृथ्वीधरायाममांसं खड्गिमांसं बलिं हरेत् ।
साक्षतं सलिलञ्चैव पञ्चगव्यं तथा चरुम् ॥
कुशान् गन्धं तथा पुष्पं ब्रह्मस्थाने निवेशयेत् ।
आममांसं पूर्व्वभागे सर्व्वस्कन्दे तुषोदकम् ॥
सितपद्मं घृतं मांसं विदार्य्यै चाग्निकोणके ।
कृशं वा पूपकं मांसमर्य्यमृण्येव दक्षिणे ॥
पिण्डञ्चैव तथा रक्तं पूतन्यै नैरृते तथा ।
साक्तुमांसं प्रदातव्यं जृम्भकायैव पश्चिमे ॥
अग्निखण्डेन सहितं रक्तपिण्डेन मिश्रितम् ।
प्रदेयं पापराक्षस्यै वायव्यां मांसमेव च ॥
उत्तरे पिलिपिच्छायै सान्द्रं रक्तं बलिं हरेत् ।
वाराहे छागमांसानि ऐशान्यां दिशि दापयेत् ॥
ततो भूतगणानान्तु राक्षसानां सुरोत्तम ! ।
पिशाचानां गणानान्तु बलिर्द्देयस्तु कामिकः ॥
एतान् वा पूजयेत् सर्व्वान् कुशपुष्पाक्षतैर्बुधः ।
एवं संपूजिता देवाः शान्तिपुष्टिप्रदा नृणाम् ॥
अपूजिता विहिंसन्ति कारकं स्थापकं तथा ।
तस्मादेतांस्तु संपूज्य गन्धपुष्पैर्मनोहरैः ।
प्रासादं कारयेद्विद्वान् गृहं वा सुरसत्तम ! ॥”
अथ प्रासादमूलारम्भः । तत्रैव ।
“ब्रह्मस्थाने ततः कुर्य्याद्वासुदेवस्य पूजनम् ।
श्रियः संपूजनं कुर्य्यात् हृषीकेशगणस्य च ॥
पूजनन्तु ततः कुर्य्याद्वासुदेवगणस्य च ।
गन्धाद्यैपुष्पनैवेद्यधूपदीपैः सुरोत्तम ! ॥
ततः संपूजयेत्तस्मिन् सर्व्वलोकधरां महीम् ।
सुरूपां प्रमदारूपां दिव्याभरणभूषिताम् ॥
ध्यात्वा समर्च्चयेद्देवीं परितुष्टां स्मिताननाम् ।
ततः प्रणम्य विज्ञाप्य तन्मयत्वेन चिन्तयेत् ॥
ततः स्वनाममन्त्रेण सर्व्वदेवमयं परम् ।
ध्यात्वा समर्च्चयेत्तत्र यत्तद्वास्तुमयं नरः ॥
ब्रह्मस्थाने ततो विद्वान् कुर्य्यादाधारमच्युते ।
तस्मिन् संस्थापयेत् कुम्भं वर्द्धन्या सह पूजि-
तम् ॥
हैमं वा राजतं वापि ताम्रमयं वा दृढं नवम् ।
सर्व्वबीजौषधीयुक्तं सुवर्णरजतान्वितम् ॥
रत्नगर्भं सुसंपूर्णं वस्त्रपूतेन वारिणा ।
प्रशस्तपल्लवोपेतं श्वेतचन्दनचर्च्चितम् ॥
पुष्पैः सुमालितं कृत्वा गन्धपुष्पैर्व्विधूपितम् ।
आहतेन च शुक्लेन वस्त्रयुग्मेन वेष्टितम् ॥
ब्रह्मस्थाने ततो मन्त्री कलसं स्थाप्य पूजयेत् ।
तस्मिंश्चतुर्म्मुखं देवं प्रजेशं मन्त्रविग्रहम् ॥
गन्धपुष्पैश्च नैवेद्यैः पूजयेत् सुमनोहरैः ।
ततो मण्डलवाह्ये तु प्राच्यां वा प्राङ्मुख-
स्थितः ॥
आचार्य्यो गृह्य संभारान् ब्रह्मादींस्तर्पयेत्
सुरान् ।
घृतैस्तैलैर्यवैर्म्मन्त्रैर्ब्रह्मादींस्तर्पयेत्ततः ॥
प्रजेशं तर्पयेद्विद्वानाहुतीनां शतेन च ।
इतरान् दशभिर्द्देवानाहुतिभिः प्रतर्पयेत् ॥
दद्यात् पूर्णाहुतिं पश्चात् वौषडन्तेन मन्त्रवित् ।
तत्र प्रणम्य विज्ञाप्य कृत्वा वै स्वस्तिवाचनम् ॥
प्रगृह्य कर्करीं सम्यङ्मण्डलन्तु प्रदक्षिणम् ।
सूत्रमार्गेण दिव्येन तोयधारान्तु भ्रामयेत् ॥
पूर्व्ववत्तेन मार्गेण सूत्रबीजानि भ्रामयेत् ।
सुशोभनं शुभं स्थानं तथा खातस्य कारयेत् ॥
ततो गर्त्तं खनेन्मध्ये हस्तमात्रप्रमाणकम् ।
चतुरङ्गुलमात्रं तदधः खन्यात् सुसम्मितम् ॥
गोमयेनोपलिप्याथ चन्दनेन च भूषयेत् ।
मध्ये दत्त्वा तु पुष्पाणि शुक्लान्यक्षतमेव च ॥
आचार्य्यः प्राङ्मुखो भूत्वा ध्यायेद्देवं चतु-
र्भुजम् ।
तूर्य्यमङ्गलघोषेण ब्रह्मघोषरवेण च ॥
अर्घ्यं दद्यात् सुरश्रेष्ठ ! कुम्भतोयेन मन्त्रवित् ।
प्रगृह्य कर्करीं तावत्कुम्भं प्रपूरयेज्जलैः ॥
सर्व्वरत्नसमाकीर्णैर्व्विमलैः सुसुगन्धिभिः ।
तस्मिन् शुक्लानि पुष्पाणि प्रक्षिपेद्दोमिति
स्मरन् ॥
तदावर्त्तं परीक्षेत वेदाद्येनाक्षतं क्षिपेत् ।
शुभं स्याद्दक्षिणावर्त्तेऽशुभं वामे भवेत्ततः ॥
बीजैः शालियवादीनां तं गर्त्तं पूरयेद्बुधः ।
अक्षताभिः पवित्राभिर्मृद्भिर्गर्त्तं प्रपूरयेत् ॥
एवं पुष्पाद्यविधिना चार्घ्यदानं सुरोत्तम ! ।
सुवर्णं गां वस्त्रयुगमाचार्य्याय निवेदयेत् ॥
कालज्ञस्थपती पूज्यौ वैष्णवान् शक्तितोऽर्च्चयेत् ।
ब्राह्मणान् भोजयित्वा च गेयनृत्यादि कारयेत् ॥
ततस्तं खातयेद्यत्नाज्जलान्तं यावदेव तु ।
पुरुषाधः स्थितं शल्यं न गृहे दोषदं भवेत् ॥
प्रासादे दोषदं शल्यं भवेद्यावज्जलान्तिकम् ।
तस्मात् प्रासादिकी भूमिः शोध्या यावज्जला-
न्तिकम् ॥
शिवान्तं कर्करान्तं वा यावद्वा भूः कुमारिका ।
आकोप्यतां समीक्ष्य ततो योगं समाचरेत् ॥”
किञ्च ।
“पूरयेत् खातकं यत्नात् पादं पादं यथाक्रमम् ।
आघट्टूलं मृत्तिकया खल्लिकं पेटिकादिभिः ॥
सिक्ता सिक्ता तु तोयेन कलसैः काञ्चनादिभिः ।
आकोटनं ततः कुर्य्यात् सुदृढैर्म्मद्दनैः ॥
पादोनं पूरयेत् खातं सुसमं चैव कारयेत् ।
देशिकः पञ्चगव्येन तां भूमिं प्रोक्षयेद्बुधः ॥
सुवर्णव्रीहिगर्भेण चूतपल्लवशोभिना ।
तीर्थतोयसुपूर्णेन स्वर्णताम्रमयेन वा ॥
सेचयेदभिजप्तेन वारिणा कलसेन तु ।
ततः शुद्धा भवेद्भूमिर्दोषयुक्तापि या भवेत् ॥”
अथ शिलालक्षणं मात्स्ये ।
“आदावेवं समासेन शिलालक्षणमुत्तमम् ।
शिलान्यासविधानञ्च प्रोच्यते तदनन्तरम् ।
शिला वापीष्टका वापि चतस्रो लक्षणान्विताः ।
प्रासादादौ विधानेन शस्तयाः सुमनोहराः ॥
चतुरस्राः समाः कृत्वा समन्तादथ वेष्टकाः ।
शिलारूपाः स्मृता विद्या नन्दाद्याश्चेष्टका-
स्तिकाः ॥
संपूर्णाः सुवृत्ताः स्निग्धाः सुषमा लक्षणा-
न्विताः ।
कुशदूर्व्वाङ्किता धन्याः सध्वजच्छत्रचामराः ॥
साङ्कुशास्तोरणोपेताः कूर्म्ममत्स्यफलान्विताः ।
दर्पणा हस्तिवक्त्राङ्काः प्रशस्तदयलाञ्छिताः ॥
शस्तपक्षिमृगाङ्काश्च वृषाङ्काः सर्व्वदा हिताः ।